श्री वामन स्तोत्रं (वामनपुराणे)

श्री वामन स्तोत्रं (वामनपुराणे)

लोमहर्षण उवाच |
देवदेवो जगद्योनिरयोनिर्जगदादिजः |
अनादिरादिर्विश्वस्य वरेण्यो वरदो हरिः || 1 ||

परावराणां परमः परापरसतां गतिः |
प्रभुः प्रमाणं मानानां सप्तलोकगुरोर्गुरुः |
स्थितिं कर्तुं जगन्नाथं सोऽचिंत्यो गर्भतां गतः || 2 ||

प्रभुः प्रभूणां परमः पराणा-
-मनादिमध्यो भगवाननंतः |
त्रैलोक्यमंशेन सनाथमेकः
कर्तुं महात्माऽदितिजोऽवतीर्णः || 3 ||

न यस्य रुद्रा न च पद्मयोनि-
-र्नेंद्रो न सूर्येंदुमरीचिमिश्राः |
जानंति दैत्याधिप यत्स्वरूपं
स वासुदेवः कलयावतीर्णः || 4 ||

यमक्षरं वेदविदो वदंति
विशंति यं ज्ञानविधूतपापाः |
यस्मिन् प्रविष्टा न पुनर्भवंति
तं वासुदेवं प्रणमामि देवं || 5 ||

भूतान्यशेषाणि यतो भवंति
यथोर्मयस्तोयनिधेरजस्रं |
लयं च यस्मिन् प्रलये प्रयांति
तं वासुदेवं प्रणतोऽस्म्यचिंत्यं || 6 ||

न यस्य रूपं न बलं प्रभावो
न च प्रतापः परमस्य पुंसः |
विज्ञायते सर्वपितामहाद्यै-
-स्तं वासुदेवं प्रणमामि नित्यं || 7 ||

रूपस्य चक्षुर्ग्रहणे त्वगेषा
स्पर्शग्रहित्री रसना रसस्य |
घ्राणं च गंधग्रहणे नियुक्तं
न घ्राणचक्षुः श्रवणादि तस्य || 8 ||

स्वयंप्रकाशः परमार्थतो यः
सर्वेश्वरो वेदितव्यः स युक्त्या |
शक्यं तमीड्यमनघं च देवं
ग्राह्यं नतोऽहं हरिमीशितारं || 9 ||

येनैकदंष्ट्रेण समुद्धृतेयं
धरा चला धारयतीह सर्वं |
शेते ग्रसित्वा सकलं जगद्य-
-स्तमीड्यमीशं प्रणतोऽस्मि विष्णुं || 10 ||

अंशावतीर्णेन च येन गर्भे
हृतानि तेजांसि महासुराणां |
नमामि तं देवमनंतमीश-
-मशेषसंसारतरोः कुठारं || 11 ||

देवो जगद्योनिरयं महात्मा
स षोडशांशेन महाऽसुरेंद्राः |
सुरेंद्रमातुर्जठरं प्रविष्टो
हृतानि वस्तेन बलं वपूंषि || 12 ||

इति श्रीवामनपुराणे नवविंशतितमोऽध्याये श्री वामन स्तोत्रं |